# Shri Sharabheshvara Mantravidhana Evam Stotram

# શ્રીશરભેશ્વરમન્ત્રવિધાન

## Document Information

Text title : Shri Sharabheshvara Mantravidhana Evam Stotram

File name : sharabheshvaramantravidhAna.itx

Category : shiva, mantra

Location : doc_shiva

Proofread by : Aruna Narayanan

Latest update : December 24, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 21, 2022

*sanskritdocuments.org*

# શ્રીશરભેશ્વરમન્ત્રવિધાન

મન્ત્ર-વિધાન-

વિનિયોગઃ - અસ્ય શ્રીશરભેશ્વર-મન્ત્રસ્ય વામદેવઋષિઃ
અતિજગતીછન્દઃ શ્રીશરભો દેવતા ૐ ખં બીજં સ્વાહા શક્તિઃ મમ
કાર્યસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

ઋષ્યાદિન્યાસ-

ૐ વામદેવઋષયે નમઃ (શિરસિ) ,
ૐ અતિજગતીછન્દસે નમઃ (મુખે),
ૐ શ્રીશરભેશ્વરદેવતાયૈ નમઃ (હૃદયે),
ૐ ખં બીજાય નમઃ (ગુહ્યે),
સ્વાહા શક્તયે નમઃ (પાદયોઃ),
વિનિયોગાય નમઃ (સર્વાઙ્ગે) ॥

કરન્યાસઃ-

ૐ ખેં ખાં ખં ફટ્ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
પ્રાણગ્રહસિ પ્રાણગ્રહસિહું ફટ્ તર્જનીભ્યાં નમઃ ।
સર્વશત્રુસંહારકાય મધ્યમાભ્યાં નમઃ ।
શરભસાલુવાય અનામિકાભ્યાં નમઃ ।
પક્ષિરાજાય કનિષ્ઠિકાભ્યાં નમઃ ।
હું ફટ્ સ્વાહા કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

હૃદયાદિન્યાસઃ-

ૐ ખેં ખાં ખં ફટ્ હૃદયાય નમઃ ।
પ્રાણગ્રહસિ શિરસે સ્વાહા ।
સર્વશત્રુસંહારકાય શિખાયૈ વષટ્ ।
શરભસાલુવાય કવચાય હુમ્ ।
પક્ષિરાજાય નેત્રત્રયાય વૌષટ્ ।
હું ફટ્ સ્વાહા અસ્ત્રાય ફટ્ ॥

ધ્યાનમ્-
મૃગસ્ત્વર્ધશરીરેણ પક્ષાભ્યાં ચઞ્ચુના દ્વિજઃ ।
ઘોરવક્ત્રશ્ચતુષ્પાદ ઊર્ધ્વનેત્રશ્ચતુર્ભુજઃ ॥

કાલાન્તદહનઃ પુણ્યો નીલજીમૂતનિસ્વનઃ ।
અરિસ્તદ્દર્શનાદેવ વિનષ્ટબલવિક્રમઃ ॥

સટાછટોગ્રરૂપાય પક્ષવિક્ષિપ્તભૂભૃતે ।
અષ્ટપાદાય રુદ્રાય નમઃ શરભમૂર્તયે ॥

અથવા-
ચન્દ્રાર્કાગ્નિસ્ત્રિદૃષ્ટિઃ કુલિશવરનખશ્ચઞ્ચલોત્યુગ્રજિહ્વઃ,
કાલી દુર્ગા ચ પક્ષૌ હૃદયજઠરગૌ ભૈરવો જઠરાગ્નિઃ ।
ઊરુસ્થૌ વ્યાધિમૃત્યૂ શરભવરખગશ્ચણ્ડવાતાતિવેગઃ,
સંહર્ત્તા સર્વશત્રૂન્ સ જયતિ શરભઃ સાલુવઃ પક્ષિરાજઃ ॥

ઇસ પ્રકાર ધ્યાન કરકે નિમ્નલિખિત મન્ત્ર કા જપ કરેં-
ૐ ખેં ખાં ખં ફટ્ પ્રાણગ્રહસિ પ્રાણગ્રહસિ હું ફટ્
સર્વશત્રુસંહારકાય શરભસાલુવાય પક્ષિરાજાય હું ફટ્ સ્વાહા ।

એક અન્ય મન્ત્ર ઇસ પ્રકાર ભી હૈ-
ૐ નમોઽષ્ટપાદાય સહસ્રબાહવે દ્વિશિરસે ત્રિનેત્રાય
દ્વિપક્ષાયાગ્નિવર્ણાય મૃગવિહઙ્ગરૂપાય વીરશરભેશ્વરાય ૐ ।

સ્તોત્ર-પાઠ નિમ્નલિખિત હૈ-જપ કે પશ્ચાત્ અથવા કેવલ સ્તોત્ર
કા પાઠ ભી કિયા જા સકતા હૈ । રાત્રિ મેં તીન પાઠ નિત્ય કરને સે
વિશેષ લાભ હોતા હૈ ।

નિગ્રહ-દારુણ-સપ્તકં
કોપોદ્રેકાતિ-નિર્યન્ નિખિલપરિચરત્ તામ્રભારપ્રભૂતં,
જ્વાલામાલાગ્રદગ્ધસ્મરતનુસકલં ત્વામહં શાલુવેશ ! ।
યાચે ત્વત્પાદપદ્મપ્રણિહિતમનસં દ્વેષ્ટિ માં યઃ ક્રિયાભિ-
સ્તસ્ય પ્રાણપ્રયાણં પરશિવ ભવતઃ શૂલભિન્નસ્ય તૂર્ણમ્ ॥ ૧॥

શમ્ભો ! ત્વદ્ધસ્તકાન્તક્ષતરિપુહૃદયાન્નિઃસ્રવલ્લોહિતૌઘં,
પીત્વા પીત્વાતિદીર્ઘા દિશિ-દિશિ વિચરાસ્ત્વદ્ગણાશ્ચણ્ડમુખ્યાઃ ।

ગર્જન્તુ ક્ષિપ્રવેગા નિખિલજયકરા ભીકરાઃ ખેલલોલાઃ,
સન્ત્રસ્તા બ્રહ્મદેવાઃ શરભ ખગપતે ! ત્રાહિ નઃ શાલુવેશ ॥ ૨॥

સર્વાદ્યં સર્વનિષ્ઠં સકલભયહરં ત્વત્સ્વરૂપં હિરણ્યં,
યાચેઽહં ત્વામમોઘં પરિકરસહિતં દ્વેષ્ટિ માં યઃ ક્રિયાભિઃ ।
શ્રીશમ્ભો ત્વત્કરાબ્જસ્થિતકુલિશવરાઘાતવક્ષઃસ્થલસ્ય,
પ્રાણાઃ પ્રેતેશદૂત ગ્રહગણપરિખાઃ ક્રોશપૂર્વં પ્રયાન્તુ ॥ ૩॥

દ્વિષ્મઃ ક્ષોણ્યાં વયં યાંસ્તવ પદકમલધ્યાનનિર્ધૂતતાપાઃ,
કૃત્યાકૃત્યૈર્વિમુક્તા વિહગકુલપતે ! ખેલયા બદ્ધમૂર્તેઃ ।
તૂર્ણં ત્વત્પાદપદ્મપ્રધૃતપરશુના તુણ્ડખણ્ડી-કૃતાઙ્ગ-
સ્તદ્દ્વેષી યાતુ યામ્યં પુરમતિકલુષં કાલપાશાગ્રબદ્ધઃ ॥ ૪॥

ભીમશ્રીશાલુવેશ ! પ્રણતભયહર પ્રાણજિદ્ દુર્મદાનાં,
યાચેઽહં ચાસ્ય વર્ગપ્રશમનમિહ તે સ્વેચ્છયા બદ્ધમૂર્તેઃ ।
ત્વામેવાશુ ત્વદઙ્ઘ્ર્યષ્ટકનખવિલસદ્ગ્રીવજિહ્વોદરસ્ય,
પ્રાણા યાન્તુ પ્રયાણં પ્રકટિતહૃદયસ્યાયુરલ્પાયતેશ ॥ ૫॥

શ્રીશૂલં તે કરાગ્રસ્થિતમુસલગદાવૃત્તવાત્યાભિઘાતાદ્,
યાતાયાતારિયૂથં ત્રિદશરવિઘનોદ્ધૂતરક્તચ્છટાર્દ્રમ્ ।
સદ્દૃષ્ટ્વાઽઽયોધને જ્યામખિલસુરગણાશ્ચાશુ નન્દન્તુ નાના-
ભૂતા વેતાલપૂગઃ પિબતુ તદખિલં પ્રીતચિત્તઃ પ્રમત્તઃ ॥ ૬॥

અલ્પં દોર્દણ્ડબાહુપ્રકટિતવિનમચ્ચણ્ડકોદણ્ડમુક્તૈ-
ર્બાણૈર્દિવ્યૈરનેકૈઃ શિથિલિતવપુષઃ ક્ષીણકોલાહલસ્ય ।
તસ્યપ્રાણાવસાનં પરશરભ વિભોઽહં ત્વદિજ્યા-પ્રભાવૈ-
સ્તૂર્ણં પશ્યામિ યો માં પરિહસતિ સદા ત્યાદિમધ્યાન્તહેતો ॥ ૭॥

ઇતિ નિશિ પ્રયતસ્તુ નિરાસનો મમમુખઃ શિવભાવમનુસ્મરન્ ।
પ્રતિદિનં દશવારદિનત્રયં જપતિ નિગ્રહ-દારુણસપ્તકમ્ ॥ ૮॥

ઇતિ ગુહ્યં મહાબીજં પરમં રિપુનાશનમ્ ।
ભાનુવારં સમારભ્ય મઙ્ગલાન્તં જપેત્ સુધીઃ ॥ ૯॥

ઇત્યાકાશભૈરવ-કલ્પે પ્રત્યક્ષસિદ્ધિપ્રદે નરસિંહકૃતા
શરભસ્તુતિઃ સમાપ્તા ।

શ્રીશરભેશ્વરપ્રાર્થના

રુદ્રઃ પિઙ્ગલ-કુન્તલસ્ત્રિનયનોઽત્યુગ્રઃ સપક્ષો હરિઃ,
સર્પાલઙ્કરણસ્તથાઽષ્ટચરણસ્તુર્યઃ શુકઃ સાલુવઃ ।
ક્ષોભં શ્રીનરસિંહજં શમયિતું નીતાવતારો હરઃ,
પાયાદ્ શ્રીશરભેશ્વરો વિહગરાટ્ સર્વાર્થદઃ શઙ્કર ॥

કાલી દુર્ગા પક્ષયોર્યસ્ય સંસ્થે, સ્વાન્તે સાક્ષાત્ સુન્દરીરાજમાના ।
ક્ષોભં યાતઃ શ્રીનૃસિંહો યતસ્તં, દેવં ભીમ સાલુવાખ્યં નમામઃ ॥

ઇતિ શ્રીરુદ્રયામલે તન્ત્રે શ્રીશરભેશ્વરસ્તુતિઃ એવં પ્રાર્થના સમાપ્તા ।

Proofread by Aruna Narayanan

*Shri Sharabheshvara Mantravidhana Evam Stotram*

pdf was typeset on July 21, 2022

Please send corrections to *sanskrit@cheerful.com*